# आदर्श-प्रश्नपत्रम् - 2, 2021-22

## द्वितीयं सत्रम्

## कक्षा - दशमी

## संस्कृतम् (कोड-122)

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः–**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति।
2. अस्य प्रश्नपत्रस्य पठनाय 20 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् एव लेखनीया।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### वर्णनात्मकाः प्रश्नाः ( अङ्काः 40 )

### अपठितावबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 10 )**

वर्तमानकाले मानवः समस्यावर्ते पतितोऽस्ति। एकत्र देहस्य अनेके रोगाः, अन्यत्र मनसः चिन्ताः। कार्यवैफल्येन नैराश्यम् भवति। जीवनशैल्याः परिवर्तनं विना मार्गान्तरं नास्ति। व्यायामाभावात् शरीरस्य स्थौल्यं वर्धते तारुण्यावस्थायाम् च मुधमेहः जायते। एतदेव व्याधिः उच्यते। आधिव्याधिभ्यां पीडितो मानवः निद्रां न लभते। मानवः अतृप्त्या सदा खिद्यते। अतः यथाशक्ति शारीरिकश्रमः कर्तव्यः। यत्र पद्भ्यां गन्तुं शक्यते तत्र वाहनेन न गन्तव्यम्। अलं श्रमचिन्त्या। इदं शरीरं पोषितमपि पालितमपि च शोभते। स्वस्थशरीरेणैव मानवः सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानाम् समाधाने कुशलः भवति। सः आध्यात्मिकज्ञानमपि लभते। उक्तञ्च 'शरीरमाद्यं खलु धर्मसाधनम्'।

**(अ) एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) कस्य अभावात् शरीरस्य स्थौल्यं वर्धते?

(*ii*) मानवः कया सदा खिद्यते?

(*iii*) वर्तमानकाले कः समस्यावर्ते पतितोऽस्ति?

**उत्तराणि–** (*i*) व्यायामस्य (*ii*) अतृप्त्या (*iii*) मानवः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(आ) पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 2 × 2 = 4 )**

(*i*) कार्यवैफल्येन किं भवति?

(*ii*) स्वस्थशरीरेणैव मानवः कासां समाधाने कुशलः भवति?

(*iii*) मानवैः यथाशक्ति कः कर्तव्यः?

**उत्तराणि–** (*i*) कार्यवैफल्येन नैराश्यं भवति।

(*ii*) स्वस्थ शरीरेणैव मानवः सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानां समाधाने कुशलः भवति।

(*iii*) मानवैः यथाशक्ति शारीरिकश्रमः कर्तव्यः।

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **( 1 )**

**उत्तरम्–** जीवनशैली अथवा अन्यः कोऽपि समुचितः शीर्षकः।

**(ई) यथानिर्देशम् उत्तरत– ( केवलं प्रश्नत्रयम् )** **( 1 × 3 = 3 )**

(*i*) 'खिद्यते' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(*ii*) 'पीडितः मानवः' अनयोः पदयोः विशेषणं किम्?

(*iii*) 'देहस्य' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?

(*iv*) अनुच्छेदे 'अन्तिमम्' पदस्य कः विपर्ययः आगतः?

**उत्तराणि–** (*i*) मानवः (*ii*) पीडितः (*iii*) शरीरस्य (*iv*) आद्यम्

## रचनात्मकं कार्यम्

**2. पितरं प्रति लिखिते पत्र रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु।** **( ½ × 10 = 5 )**

(*i*) ........................

दिनाङ्कः ......................

पूज्याः (*ii*) ......................

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्नः भविष्यति यद् गतदिवसे अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया (*iii*) .................. स्थानं लब्धम्। क्रीडादिवसे (*iv*) ................ अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (*v*) ................। अयं वार्षिकोत्सवः आगामि-सोमवासरे (*vi*) ..........................। विद्यालयस्य पक्षतः ह्यः एव (*vii*) .................. प्रेषितम्। अहमपि (*viii*) ..................सूचयामि, भवान् अवश्यम् आगच्छतु। मम (*ix*) .................. भविष्यति।

भवतः आज्ञाकारी पुत्रः,

(*x*)................................।

**मञ्जूषा–** निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, पीयूषः, उत्साहवर्धनम्, भवन्तम्, प्रयागराजतः, प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते।

**उत्तराणि–** (*i*) प्रयागराजतः (*ii*) पितृमहोदयाः (*iii*) प्रथमम् (*iv*) धावनप्रतियोगितायाम्

(*v*) करिष्यामि (*vi*) आयोजयिष्यते (*vii*) निमन्त्रणपत्रम् (*viii*) भवन्तम्

(*ix*) उत्साहवर्धनम् (*x*) पीयूषः

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** **( 1 × 5 = 5 )**

Get More Learning Materials Here : CLICK HERE www.studentbro.in



| | |
|---|---|
| **मञ्जूषा–** | पति, पत्नी, बालिका, वृक्षा:, बहव:, जना:, परस्परं, वार्तालापं, कुर्वन्ति, लिखति, पत्राणि, वृद्धजना:, अपि, सन्ति, स्त्रिय: पुरुषा:। |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत–** **(1 × 5 = 5)**

**"पुस्तकमेलकम्"**

| | |
|---|---|
| **मञ्जूषा–** | चित्राणि, पुस्तकानि, मित्राणि, लोकार्पणम्, अभवत्, अतीवप्रसन्ना, ध्वनिमुद्रिका:, संगणकम्, अन्त:प्रवेश:, विविधं साहित्यम्, विभिन्नानि, प्रकोष्ठानि, संस्कृत-पुस्तकानि, जना:, पश्यन्ति। |

**उत्तराणि–** (*i*) इदम् एकं उद्यानस्य चित्रम् अस्ति।

(*ii*) चित्रे बहव: वृक्षा: सन्ति। वृक्षे पत्राणि अपि सन्ति।

(*iii*) तत्र पति पत्नी अन्ये जना: च परस्परं वार्तालापं कुर्वन्ति।

(*iv*) बालिका: वृद्धजना: च सन्ति।

(*v*) जना: व्यायामं कुर्वन्ति।

**अथवा**

(*i*) पुस्तकमेलकं विस्तृते क्षेत्रे आयोजितम् अस्ति।

(*ii*) तत्र पुस्तकमेलकस्य अन्त: प्रवेश: अतीवप्रसन्नदायकम् अस्ति।

(*iii*) पुस्तकमेलके अनेकानि चित्राणि, पुस्तकानि, संगणकं च आसन्।

(*iv*) तत्र अनेकानि संस्कृत-पुस्तकानि च आसन्।

(*v*) तत्र विविधं साहित्यम् आसीत् येषां लोकार्पणं भवति स्म।

4. **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** **(1 × 5 = 5)**

(*i*) लता नाचती है। (Lata dances.)

(*ii*) तुम सब गेंद से खेलते हो। (All of you play with ball.)

(*iii*) कल मोहन बाज़ार जायेगा। (Mohan will go to the market tomorrow.)

(*iv*) कल रमेश कहाँ था? (Where was Ramesh yesterday?)

(*v*) रमा सीता के साथ पढ़े। (Rama should study with Sita.)

(*vi*) वृक्ष से पत्ते गिरते हैं। (Leaves fall down from the tree.)

(*vii*) क्या मैं पढ़ूँ? (May I read?)

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तराणि–**

(*i*) लता नृत्यति।

(*ii*) यूयं कन्दुकेन क्रीडथ।

(*iii*) श्वः मोहनः आपणं गमिष्यति।

(*iv*) ह्यः रमेशः कुत्र आसीत्?

(*v*) रमा सीतया सह पठतु/पठेत्।

(*vi*) वृक्षात् पत्राणि पतन्ति।

(*vii*) किम् अहं पठानि?

## पठितावबोधनम्

**5. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(3)**

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् सः शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्– मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि। त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वम् वर्षत्रयस्य कारादण्डं लप्स्यसे इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **(½ × 2 = 1)**

(*i*) आरक्षिणि किम् प्रस्तुतवति आश्चर्यमघटत्?

(*ii*) न्यायाधीशेन कस्याः विषये वक्तुमादिष्टौ?

(*iii*) न्यायाधीशः आरक्षिणम् किम् आदिष्टवान्?

**उत्तराणि–** (*i*) निजपक्षं

(*ii*) घटनायाः

(*iii*) कारादण्डम्

**(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** **(1 × 2 = 2)**

(*i*) न्यायालये किम् आश्चर्यम् अघटत्?

(*ii*) शवः न्यायाधीशं किं निवेदितवान्?

(*iii*) न्यायाधीशः किम् निर्णयम् श्रावितवान्?

**उत्तराणि–** (*i*) न्यायालये आश्चर्यम् अघटत् यत् सः शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्।

(*ii*) शवः न्यायाधीशं निवेदितवान्–मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि। त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व।

(*iii*) न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **(3)**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥**

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** **(½ × 2 = 1)**

(*i*) कः विद्याधनं यच्छति?

(*ii*) पिता विद्याधनं कदा यच्छति?

(*iii*) विद्याधनं कीदृशम् अस्ति?

**उत्तराणि–** (*i*) पिता

(*ii*) बाल्ये

(*iii*) महत्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(आ) **पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1 × 2 = 2 )**

(*i*) पिता कस्मै विद्याधनं यच्छति?

(*ii*) धनात् महत्तरं किम् धनम्?

(*iii*) किम् कथनम् तत् कृतज्ञता?

**उत्तराणि–** (*i*) पिता पुत्राय विद्याधनं यच्छति।

(*ii*) धनात् महत्तरं विद्याधनम् भवति।

(*iii*) पिताऽस्य किं तपस्तेपे कथनम् हि तत् कृतज्ञता।

7. **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **( 3 )**

**व्याघ्र चित्रकौ** – अरे किं वनराजपदाय सुपात्रं चीयते?

एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

**सिंहः** – तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एवे वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यते अतएव विचारविमर्शः प्रचलितः।

**बकः** – सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।

(अ) **एकपदेन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( ½ × 2 = 1 )**

(*i*) कस्मै पदाय सुपात्रं चीयते?

(*ii*) आवाम् एव योग्यौ इति कौ वदतः?

(*iii*) "युवाम् अपि मत्सदृशौ भक्षकौ।" अत्र 'युवाम्' पदं काभ्याम् प्रयुक्तम्?

**उत्तराणि–** (*i*) वनराज (*ii*) व्याघ्रचित्रकौ (*iii*) व्याघ्रचित्रकाभ्याम्

(आ) **पूर्णवाक्येन उत्तरत– ( केवलं प्रश्नद्वयम् )** **( 1× 2 = 2 )**

(*i*) सिंहः किम् कथयति?

(*ii*) बकः सिंहं किम् कथयति?

(*iii*) व्याघ्रचित्रकौ वनराजपदाय किम् अकथयताम्?

**उत्तराणि–** (*i*) सिंहः कथयति- तूष्णीं भव भोः! युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ।

(*ii*) बकः सिंहं कथयति- सर्वथा सम्यगुक्तं सिंहमहोदयेन। बहुकालपर्यन्तं सिंहेन शासनं कृतम् अधुना तु कोऽपि पक्षी एव राजा भवेत्।

(*iii*) व्याघ्रचित्रकौ अकथयताम्- अरे किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ।

8. **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत–** **( ½× 4 = 2 )**

**उदीरितोऽर्थः पशुनापि गृह्यते,**
**हयाश्च नागाश्च वहन्ति बोधिताः।**
**अनुक्तमप्यूहति पण्डितो जनः,**
**परेङ्गितज्ञानफला हि बुद्धयः॥**

**अन्वयः–** (*i*) ..................... अपि उदीरितः अर्थः ..................... गृह्यते, बोधिताः हयाः च (*ii*) .....................च (भारम्) वहन्ति।
(*iii*) ..................... जनः अनुक्तम् अपि ऊहति। (*iv*) ..................... परेङ्गितज्ञानफलाः हि (भवन्ति)।

**मञ्जूषा–** पण्डितः, पशुना, बुद्धयः, नागाः

**उत्तराणि–** (*i*) पशुना (*ii*) नागाः (*iii*) पण्डितः (*iv*) बुद्धयः

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** **( ½ × 4 = 2 )**

**वाक्पटुधैर्यवान् मंत्री सभायामप्यकातरः।**
**स केनापि प्रकारेण परैर्न परिभूयते॥**

**भावार्थः–** यः मन्त्री (*i*) ........................ सम्भाषणे चतुरः, धैर्ययुक्तः, (*ii*) ........................ च भवति, सः मन्त्री (*iii*) ........................ कथमपि (*iv*) ........................ न शक्यते।

**मञ्जूषा–** तिरस्कर्तुम्, निर्भीकः, सभायाम्, विरोधिभिः

**उत्तराणि–** (*i*) सभायाम् (*ii*) निर्भीकः (*iii*) विरोधिभिः (*iv*) तिरस्कर्तुम्

9. **अधोलिखितं कथांशं समुचितक्रमेण लिखत–** **( ½ × 8 = 4 )**

(*i*) वनस्य समीपे एका नदी वहति।

(*ii*) एवमेव वानराः वारं-वारं सिंहं तुदन्ति।

(*iii*) अपरः वानरः सिंहस्य कर्णमाकृष्यति।

(*iv*) एकः सिंहः सुखेन विश्रामं करोति।

(*v*) सिंहः क्रुद्धः भवति।

(*vi*) एकः वानरः तस्य पुच्छं धुनोति।

(*vii*) सः तम् प्रहर्तुमिच्छति।

(*viii*) वानरः कूर्दित्वा वृक्षमारोहति।

**उत्तराणि–**

(*i*) वनस्य समीपे एका नदी वहति।

(*ii*) एकः सिंहः सुखेन विश्रामं करोति।

(*iii*) एकः वानरः तस्य पुच्छं धुनोति।

(*iv*) सिंहः क्रुद्धः भवति।

(*v*) सः तम् प्रहर्तुमिच्छति।

(*vi*) वानरः कूर्दित्वा वृक्षमारोहति।

(*vii*) अपरः वानरः सिंहस्य कर्णमाकृष्यति।

(*viii*) एवमेव वानराः वारं-वारं सिंहं तुदन्ति।

Get More Learning Materials Here : CLICK HERE www.studentbro.in